
# द्रुतवाचनम्

## 3. छात्रचर्या

[मनुष्यों का आरम्भिक जीवनकाल छात्रावस्था के रूप में अपेक्षित है । प्राचीनकाल में जीवन चार आश्रमों में विभक्त था - ब्रह्मचर्य, गृहस्थ, वानप्रस्थ तथा संन्यास । ब्रह्मचर्य आश्रम को ही छात्र जीवन कहा जाता है । इस अवस्था में ज्ञान और बल दोनों का अर्जन करने से पूरा जीवनकाल अच्छा होता है । इसीलिए इस आश्रम पर प्राचीन भारत में बहुत बल दिया गया है । आज तो स्थान-स्थान पर शिक्षालय सुलभ हैं किन्तु प्राचीन समय में ज्ञानार्जन के लिए छात्रों को घर छोड़कर दूर जाना पड़ता था । गुरु के आश्रम में ज्ञान और बल का अर्जन एवं उचित अनुशासन की शिक्षा मिलती थी । आज के आवासीय विद्यालय कुछ इसी प्रकार की गतिविधि रखते हैं । यही कारण है कि गृहत्याग पर बल दिया जाता था ।]





छादयति छत्रवत् गुरोः दोषान् इति छात्रः कथ्यते । विद्यार्थी, शिक्षार्थी, ब्रह्मचारी इत्यपि तस्यैव नामान्तरं कथ्यते । गुरोः सम्बन्धेन स शिष्यः इत्यपि कथ्यते । गुरुशिष्यौ इति सापेक्षौ शब्दौ । शिष्येण एव गुरुः भवति, गुरुणा एव शिष्यः भवति । शासनात् अर्थात्

गुरोः अनुशासनग्रहणेन शिष्यः उच्यते (शास् + क्यप्) । 'चर्या' शब्दः चर् धातोः यत् प्रत्ययेन निष्पन्नः । अस्यार्थः आचरणं व्यवहारः नियमाः इति यावत् । एवं छात्राणां ये नियमाः सन्ति, या च दिनचर्या भवेत् सा एव छात्रचर्या ।



छात्राः शिक्षार्थं यां जीवनचर्यां गृह्णन्ति सा जीवनचर्या तपस्यारूपा । अतएव कथ्यते – छात्राणां अध्ययनमेव छात्राणां तपस्या इति भावः । छात्राः यत्र निवसेयुः तत्र ब्राह्ममुहूर्ते अर्थात् सूर्योदयात् पर्याप्तं पूर्वं जागृयुः । ब्राह्मे मुहूर्ते जागरणेन बुद्धिः सम्यक् प्रकाशते इति कथयन्ति आयुर्विदः । बुद्धिशुद्धौ तु शरीरमपि शुध्यति । कार्येषु उत्साहः जायते । अतः प्रातरेव जागरणं छात्रस्य कर्तव्यम् । यथायोग्यम् अभिवादनं च प्रातःकाले

सहाध्यायिनां गुरूणां च करणीयम् । तदनु नित्यकर्माणि कर्तव्यानि । शरीरस्य यथासाध्यं शोधनं कर्तव्यम् । प्रातःकाले स्मरणशक्तिः प्रकृष्टा भवति । अतः निर्धारितं पाठं स्मरेत् । यः पाठः स्मरणे कालान्तरे पर्याप्तं कालम् अपेक्षते, स प्रातःकाले अल्पमेव कालमपेक्षते ।



गुरूणां सहायतया छात्राः स्व-स्व-पाठस्य बोधमपि अल्पसमयेन कुर्वन्ति । अतः गुरुसेवा छात्राणां धर्मः कथ्यते । सेवया प्रसन्नाः गुरवः स्वकीयम् अनुभवं छात्रेभ्यः प्रयच्छन्ति । पाठशालायां बहूनि कार्याणि छात्रेभ्यः दीयन्ते । तैः कार्यैः छात्राणां हितमेव भवति । अतः कार्यसम्पादने कदापि आलस्यं न कुर्यात् ।

यथासमयं प्राप्तेन आहारेण संतोषं कुर्यात् । छात्राः अल्पाहाराः स्युः इति प्राचीना नीतिः । उक्तं च -

काकचेष्टा वकध्यानं निद्रा चैव शुनः समा ।
अल्पाहारः गृहत्यागः विद्यार्थी पञ्चलक्षणः ॥

एतानि छात्राणां लक्षणानि सन्ति । कथम् ? काक इव चेष्टा भवेत् । यथा काकः निरन्तरं प्रयत्नशीलः दृश्यते तथैव छात्रोऽपि सततमुद्यमशीलः भवेत् । एवं वकः इव ध्यानमपि कुर्यात् । तस्य निद्रा शुनः इव क्षणिका भवेत् । अर्थात् बहुकालं यावत् स न शयीत । तस्य भोजनम् अल्पं स्यात् । तथा गृहस्य ममत्वस्य त्यागेऽपि उत्साहितः स भवेत्। अनेन अध्ययनं प्रति तस्यानुरागः प्रवर्धेत । अत्र छात्रस्य सम्पूर्णा चर्या निरूपिता वर्तते ।

**शब्दार्थाः -**

| | | |
|---|---|---|
| छादयति | = | ढँकता है |
| छत्रवत् | = | छाता की तरह |
| गुरोः | = | गुरु के |
| कथ्यते | = | कहा जाता है |
| इत्यपि | = | यह भी |
| तस्यैव | = | उसका भी |
| नामान्तरम् | = | दूसरा नाम |
| सम्बन्धेन | = | सम्बन्ध के कारण |
| सापेक्षौ | = | एक दूसरे से जुड़े हुए |
| शिष्येण | = | शिष्य द्वारा |
| शासनात् | = | शासन से |

| | | |
|---|---|---|
| अनुशासनग्रहणेन | = | अनुशासन ग्रहण करने से |
| उच्यते | = | कहा जाता है |
| प्रयत्नेन | = | प्रयास से |
| निष्पन्नः | = | निकला हुआ, सम्पन्न |
| अस्यार्थः | = | इसका अर्थ |
| आचरणम् | = | आचरण, व्यवहार |
| यावत् | = | जबतक |
| भवेत् | = | होना चाहिए |
| छात्रचर्या | = | छात्र का क्रिया-कलाप |
| शिक्षार्थम् | = | शिक्षा ग्रहण करने के लिए |
| जीवनचर्याम् | = | जीवन के क्रिया-कलाप को |
| गृह्णन्ति | = | ग्रहण करते हैं |
| तपस्यारूपा | = | तपस्या जैसी |
| अध्ययनमेव | = | अध्ययन ही |
| निवसेयुः | = | निवास करें |
| ब्राह्ममुहूर्ते | = | ब्राह्ममुहूर्त (सुबह 4 बजे से सूर्योदयपूर्व का समय-ब्राह्मवेला) |
| जागरणेन | = | जागने से |

| | | |
|---|---|---|
| सम्यक् | = | ठीक से |
| प्रकाशते | = | प्रकाशित होता है |
| आयुर्विदः | = | आयुर्वेद के जानकार |
| बुद्धिशुद्धौ | = | बुद्धि के शुद्ध होने पर |
| शुध्यति | = | शुद्ध होता है |
| कार्येषु | = | कार्यों में |
| जायते | = | उत्पन्न होता है |
| प्रातरेव | = | प्रातः काल में ही, सुबह में ही |
| जागरणम् | = | जागना |
| यथायोग्यम् | = | जहाँ तक योग्य हो |
| अभिवादनम् | = | अभिवादन, प्रणामादि |
| सहाध्यायिनाम् | = | साथ में अध्ययन करने वालों का |
| करणीयम् | = | करना चाहिए |
| तदनु | = | उसके बाद |
| नित्यकर्माणि | = | नित्यकर्म, प्रतिदिन के कार्य |
| कर्तव्यानि | = | करना चाहिए |
| यथासाध्यम् | = | जहाँ तक हो सके |

| | | |
|---|---|---|
| शोधनम् | = | सफाई |
| प्रकृष्टा | = | अच्छी |
| स्मरेत् | = | याद करें |
| स्मरणे | = | याद करने में |
| कालान्तरे | = | बाद में |
| अपेक्षते | = | अपेक्षा रखता है |
| अल्पमेव | = | थोड़ा ही |
| कालमपेक्षते | = | समय चाहता है |
| स्व-स्व-पाठस्य | = | अपने-अपने पाठ का |
| बोधमपि | = | ज्ञान भी |
| अल्पसमयेन | = | थोड़ा समय से |
| सेवया | = | सेवा से |
| प्रसन्नाः | = | खुश |
| स्वकीयम् अनुभवम् | = | अपने अनुभव को |
| प्रयच्छन्ति | = | प्रदान करते हैं |
| पाठशालायाम् | = | पाठशाला में, विद्यालय में |
| बहूनि कार्याणि | = | अनेक कार्य |

| | | |
|---|---|---|
| दीयन्ते | = | दिये जाते हैं |
| तैः | = | उन |
| हितमेव | = | हित, कल्याण ही |
| कार्य-सम्पादने | = | कार्य पूरा करने में |
| कदापि | = | कभी |
| कुर्यात् | = | करना चाहिए |
| यथासमयम् | = | सही समय पर, जिसे जब होना चाहिए तब |
| प्राप्तेन आहारेण | = | प्राप्त भोजन से |
| अल्पाहारः | = | थोड़ा भोजन करनेवाला, जलपान |
| स्युः | = | होना चाहिए |
| काकचेष्टा | = | कौए की तरह सावधानी |
| वकध्यानम् | = | बगुले के समान ध्यान रखना |
| निद्रा | = | नींद |
| शुनः | = | कुत्ते का |
| समा | = | समान |
| गृहत्यागः | = | घर का परित्याग |
| एतानि लक्षणानि | = | ये लक्षण |

| | | |
|---|---|---|
| निरन्तरम् | = | लगातार |
| प्रयत्नशील: | = | प्रयासरत |
| दृश्यते | = | देखा जाता है |
| तथैव | = | वैसे ही |
| छात्रोऽपि | = | छात्र भी |
| सततमुद्यमशील: | = | लगातार काम करनेवाला |
| वक: | = | बगुला |
| क्षणिका | = | अत्यन्त कम समय तक रहनेवाली |
| भवेत् | = | होना चाहिए |
| बहुकालं यावत् | = | लम्बे समय तक |
| शयीत | = | सोना चाहिए |
| अल्पम् | = | थोड़ा |
| स्यात् | = | होना चाहिए |
| गृहस्य | = | घर का |
| ममत्वस्य | = | मोह का |
| त्यागेऽपि | = | छोड़ने पर भी |
| अनेन | = | इससे |
| तस्यानुराग: | = | उसका लगाव |

| | | |
|---|---|---|
| प्रवर्धेत | = | बढ़ना चाहिए |
| निरूपिता | = | प्रकट की गई |

## व्याकरणम्

### सन्धि-विच्छेदः/पदविच्छेदः -

| | | |
|---|---|---|
| इत्यपि | = | इति + अपि (यण्सन्धिः) |
| तस्यैव | = | तस्य +एव (वृद्धिसन्धिः) |
| नामान्तरम् | = | नाम + अन्तरम् (दीर्घसन्धिः) |
| अस्यार्थः | = | अस्य + अर्थः (दीर्घसन्धिः) |
| अध्ययनमेव | = | अध्ययनम् +एव |
| आयुर्विदः | = | आयुः + विदः (विसर्गसन्धिः) |
| शरीरमपि | = | शरीरम् + अपि |
| प्रातरेव | = | प्रातः + एव (विसर्गसन्धिः) |
| सहाध्यायिनाम् | = | सह + अध्यायिनाम् (दीर्घसन्धिः) |
| कदापि | = | कदा + अपि (दीर्घसन्धिः) |
| कालान्तरे | = | काल + अन्तरे (दीर्घसन्धिः) |
| अल्पाहारः | = | अल्प + आहारः (दीर्घसन्धिः) |
| छात्रोऽपि | = | छात्रः + अपि (विसर्गसन्धिः) |
| तस्यानुरागः | = | तस्य + अनुरागः (दीर्घसन्धिः) |

**प्रकृति-प्रत्यय-विभागः -**

| | | |
|---|---|---|
| छादयति | = | √छद् + णिच्, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| कथ्यते | = | √कथ् + कर्मवाच्य, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| उच्यते | = | √वच्, कर्मवाच्य, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| गृह्णन्ति | = | √ग्रह्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| जागृयुः | = | √जागृ, विधिलिङ्लकारः, प्रथमपुरुषः, बहुवचनम् |
| प्रकाशते | = | प्र + √काश्, आत्मनेपदी, लट्लकारः |
| कथयन्ति | = | √कथ्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| शुध्यति | = | √शुध्, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| जायते | = | √जन्, आत्मनेपदी, लट्लकारः, एकवचनम् |
| कर्तव्यम् | = | √कृ + तव्यत्, एकवचनम् |
| करणीयम् | = | √कृ + अनीयर्, एकवचनम् |
| प्रकृष्टा | = | प्र + √कृष् + क्त, स्त्री०, एकवचनम् |
| कुर्वन्ति | = | √कृ, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| दीयन्ते | = | √दा + कर्मवाच्य, आत्मनेपदी, प्रथमपुरुषः, बहुवचनम् |
| शयीत | = | √शीङ् + विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |

# अभ्यासः

## मौखिकः

1. **अधोलिखितानां पदानाम् अर्थं वदत -**

गुरोः, कथ्यते, सम्बन्धेन, शिष्येण, यावत्, दिनचर्या, छात्रचर्या, ब्राह्ममुहूर्ते, अल्पाहारः, काकचेष्टा ।

2. **निम्नलिखितानां पदानाम् एकवचनरूपं वदत -**

गुरोः, शब्दौ, सन्ति, कुर्वन्ति, प्रयच्छन्ति, भवन्ति, स्तः ।

## लिखितः

1. **एकपदेन उत्तरत -**

(क) छात्रः गुरोः दोषान् किं करोति ?

(ख) विद्यार्थी, शिक्षार्थी इति कस्य नामान्तरम् ?

(ग) 'चर्या' शब्दः कस्मात् धातोः निष्पन्नः ?

(घ) छात्रस्य जीवनचर्या किंरूपा ?

(ङ) छात्राः कदा जागृयुः ?

2. **सन्धि-विच्छेदं पदच्छेदं वा कुरुत -**

(क) कालान्तरे = ............................

(ख) कदापि = ............................

(ग) अल्पाहारः = ............................

(घ) विद्यार्थी = ............................

(ङ) त्यागेऽपि = ..............................

3. **संस्कृतभाषायां वाक्यनिर्माणं कुरुत -**

काकः, आलस्यम्, विद्यार्थी, इव, अध्ययनम्

4. **प्रकृति-प्रत्यय-विभागं कुरुत -**

कर्तव्यम्, शुध्यति, करणीयम्, भवति, कुर्यात्

5. **कोष्ठात् उचितं शब्दं चित्वा रिक्तस्थानानि पूरयत -**

| |
|---|
| तपः, लक्षणानि, छात्राणां, पूर्वम्, प्रकाशते |

(क) एतानि छात्राणां .......................... सन्ति ।

(ख) अतः प्रातरेव जागरणं ................. कर्त्तव्यम् ।

(ग) छात्राणाम् अध्ययनं ..................... ।

(घ) ब्राह्मे मुहूर्ते जागरणेन बुद्धिः सम्यक् ............................ ।

(ङ) सूर्योदयात् पर्याप्तं ........................... जागृयुः ।

◆◆◆